श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गरामानुजमहादेशिकैः (श्रीमुष्णं आण्डवन्) अनुगृहीतं

॥ श्री प्रपन्न नवनीतम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री प्रपन्न नवनीतम् ॥

पद्माभिरामसुभगौ परमात्मरूपौ
नित्यानुभाव्यमहिमौ निगमान्तवेद्यौ।
भक्तिप्रपत्तिसुलभौ परतत्त्वरूपौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये॥ 1॥

रेखारथाङ्ग सरसीरुह शङ्खचिह्नौ
क्षेमङ्करौ हिततमौ तपनीयरूपौ।
सर्वार्तिभञ्जनपरौ सकलैकवन्द्यौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये॥ 2॥

मानप्रमेयमितिदौ मनुजप्यशीलौ
देदीप्यमानगुणिनौ त्रिदशेन्द्रपूज्यौ।
वेदान्तवेद्यविभवौ विहगेन्द्रवाह्यौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये॥ 3॥

याञ्छातिपाति फलदौ यमिनां हि भाव्यौ
कञ्जासनादिमहितौ कमनीयवेषौ।
षाड्गुण्यविग्रहयुतौ शमितान्धकारौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये॥ 4॥

चक्रादिचिह्नललितौ सकलागमाद्यौ
रामावतारसमये रमणीयवेषौ।

कान्तार सञ्जनितकण्टकशुद्धिदक्षौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥ 5 ॥

प्रीतिप्रसन्न हृदयाब्जमरालभूतौ
नित्यप्रपन्न परहंस निवासपद्मौ।
भक्तार्तिभञ्जनविधौ परमायुधौ तौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥ 6 ॥

तिर्यग्भिरत्र मनुजादि गणैश्च सेव्यौ
तीव्रादिभिन्नदशया फलभेदवन्तौ।
तत्त्वार्थदर्शकवरौ तपनीय वर्णौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥ 7 ॥

सन्यस्तयोगिसुलभावमृतस्य सेतू
संसारसागर समुत्तरणैक हेतू।
विध्यादिदेवपदवीविनियोगसाधू
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥ 8 ॥

मानातिभूमिविभवौ महनीयभोग्यौ
स्तोत्रप्रियौ श्रुतिमतां सुलभोदितार्थौ।
तन्त्रेषु मन्त्रनिवहेषु च तुल्यरूपौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥ 9 ॥

प्रपदन नवनीतं प्रांशुहस्तोपनीतं
निगमचरमगीतं नीतिमार्गानपेतम्।
निरवधिगुणजालं श्रीवराहोपहारं
जयतु जयतु नित्यं प्राप्य पद्मासहायः ॥ 10 ॥

॥ इति श्री प्रपन्न नवनीतं समाप्तम् ॥